# નિર્ગુણમાનસ પૂજ

શિષ્ય ઉવાચ ..

અખણ્ડે સચ્ચિદાનન્દે નિર્વિકલ્પૈકરૂપિણિ .
સ્થિતેઽદ્વિતીયભાવેઽપિ કથં પૂજા વિધીયતે .. ૧..
પૂર્ણસ્યાવાહનં કુત્ર સર્વાધારસ્ય ચાસનમ્ .
સ્વચ્છસ્ય પાદ્યમર્ઘ્યં ચ શુદ્ધસ્યાચમનં કુતઃ .. ૨..
નિર્મલસ્ય કુતઃ સ્નાનં વાસો વિશ્વોદરસ્ય ચ .
અગોત્રસ્ય ત્વવર્ણસ્ય કુતસ્તસ્યોપવીતકમ્ .. ૩..
નિર્લેપસ્ય કુતો ગન્ધઃ પુષ્પં નિર્વાસનસ્ય ચ .
નિર્વિશેષસ્ય કા ભૂષા કોઽલઙ્કારો નિરાકૃતેઃ .. ૪..
નિરઞ્જનસ્ય કિં ધૂપૈર્દીપૈર્વા સર્વસાક્ષિણઃ .
નિજાનન્દૈકતૃપ્તસ્ય નૈવેદ્યં કિં ભવેદિહ .. ૫..
વિશ્વાનન્દયિતુસ્તસ્ય કિં તામ્બૂલં પ્રકલ્પતે .
સ્વયંપ્રકાશચિદ્રૂપો યોઽસાવર્કાદિભાસકઃ .. ૬..
ગીયતે શ્રુતિભિસ્તસ્ય નીરાજનવિધિઃ કુતઃ .
પ્રદક્ષિણમનન્તસ્ય પ્રણામોઽદ્વયવસ્તુનઃ .. ૭..
વેદવાચામવેદ્યસ્ય કિં વા સ્તોત્રં વિધીયતે .
અન્તર્બહિઃ સંસ્થિતસ્ય ઉદ્વાસનવિધિઃ કુતઃ .. ૮..

ગુરુરુવાચ ..

આરાધયામિ મણિસંનિભમાત્મલિઙ્ગમ્
માયાપુરીહૃદયપઙ્કજસંનિવિષ્ટમ્ .
શ્રદ્ધાનદીવિમલચિત્તજલાભિષેકૈ-
ર્નિત્યં સમાધિકુસુમૈર્નપુનર્ભવાય .. ૯..
અયમેકોઽવશિષ્ટોઽસ્મીત્યેવમાવાહયેચ્છિવમ્ .
આસનં કલ્પયેત્પશ્ચાત્સ્વપ્રતિષ્ઠાત્મચિન્તનમ્ .. ૧૦..
પુણ્યપાપરજઃસઙ્ગો મમ નાસ્તીતિ વેદનમ્ .

પાદ્યં સમર્પયેદ્વિદ્વન્સર્વકલ્મષનાશનમ્ .. ૧૧..
અનાદિકલ્પવિધૃતમૂલાજ્ઞાનજલાજલિમ્ .
વિસૃજેદાત્મલિઙ્ગસ્ય તદેવાર્ઘ્યસમર્પણમ્ .. ૧૨..
બ્રહ્માનન્દાબ્ધિકલ્લોલકણકોટ્યંશલેશકમ્ .
પિબન્તીન્દ્રાદય ઇતિ ધ્યાનમાચમનં મતમ્ .. ૧૩..
બ્રહ્માનન્દજલેનૈવ લોકાઃ સર્વે પરિપ્લુતાઃ .
અચ્છેદ્યોઽયમિતિ ધ્યાનમભિષેચનમાત્મનઃ .. ૧૪..
નિરાવરણચૈતન્યં પ્રકાશોઽસ્મીતિ ચિન્તનમ્ .
આત્મલિઙ્ગસ્ય સદ્વસ્ત્રમિત્યેવં ચિન્તયેન્મુનિઃ .. ૧૫..
ત્રિગુણાત્માશેષલોકમાલિકાસૂત્રમસ્મ્યહમ્ .
ઇતિ નિશ્ચયમેવાત્ર હ્યુપવીતં પરં મતમ્ .. ૧૬..
અનેકવાસનામિશ્રપ્રપઞ્ચોઽયં ધૃતો મયા .
નાન્યેનેત્યનુસન્ધાનમાત્મનશ્ચન્દનં ભવેત્ .. ૧૭..
રજઃસત્ત્વતમોવૃત્તિત્યાગરૂપૈસ્તિલાક્ષતૈઃ .
આત્મલિઙ્ગં યજેન્નિત્યં જીવન્મુક્તિપ્રસિદ્ધયે .. ૧૮..
ઈશ્વરો ગુરુરાત્મેતિ ભેદત્રયવિવર્જિતૈઃ .
બિલ્વપત્રૈરદ્વિતીયૈરાત્મલિઙ્ગં યજેચ્છિવમ્ .. ૧૯..
સમસ્તવાસનાત્યાગં ધૂપં તસ્ય વિચિન્તયેત્ .
જ્યોતિર્મયાત્મવિજ્ઞાનં દીપં સન્દર્શયેદ્બુધઃ .. ૨૦..
નૈવેદ્યમાત્મલિઙ્ગસ્ય બ્રહ્માણ્ડાખ્યં મહોદનમ્ .
પિબાનન્દરસં સ્વાદુ મૃત્યુરસ્યોપસેચનમ્ .. ૨૧..
અજ્ઞાનોચ્છિષ્ટકરસ્ય ક્ષાલનં જ્ઞાનવારિણા .
વિશુદ્ધસ્યાત્મલિઙ્ગસ્ય હસ્તપ્રક્ષાલનં સ્મરેત્ .. ૨૨..
રાગાદિગુણશૂન્યસ્ય શિવસ્ય પરમાત્મનઃ .
સરાગવિષયાભ્યાસત્યાગસ્તામ્બૂલચર્વણમ્ .. ૨૩..
અજ્ઞાનધ્વાન્તવિધ્વંસપ્રચણ્ડમતિભાસ્કરમ્ .

આત્મનો બ્રહ્મતાજ્ઞાનં નીરાજનમિહાત્મનઃ .. ૨૪..
વિવિધબ્રહ્મસંદૃષ્ટિર્માલિકાભિરલઙ્કૃતમ્ .
પૂર્ણાનન્દાત્મતાદૃષ્ટિં પુષ્પાજલિમનુસ્મરેત્ .. ૨૫..
પરિભ્રમન્તિ બ્રહ્માણ્ડસહસ્રાણિ મયીશ્વરે .
કૂટસ્થાચલરૂપોઽહમિતિ ધ્યાનં પ્રદક્ષિણમ્ .. ૨૬..
વિશ્વવન્દ્યોઽહમેવાસ્મિ નાસ્તિ વન્દ્યો મદન્યતઃ .
ઇત્યાલોચનમેવાત્ર સ્વાત્મલિઙ્ગસ્ય વન્દનમ્ .. ૨૭..
આત્મનઃ સત્ક્રિયા પ્રોક્તા કર્તવ્યાભાવભાવના .
નામરૂપવ્યતીતાત્મચિન્તનં નામકીર્તનમ્ .. ૨૮..
શ્રવણં તસ્ય દેવસ્ય શ્રોતવ્યાભાવચિન્તનમ્ .
મનનં ત્વાત્મલિઙ્ગસ્ય મન્તવ્યાભાવચિન્તનમ્ .. ૨૯..
ધ્યાતવ્યાભાવવિજ્ઞાનં નિદિધ્યાસનમાત્મનઃ .
સમસ્તભ્રાન્તિવિક્ષેપરાહિત્યેનાત્મનિષ્ઠતા .. ૩૦..
સમાધિરાત્મનો નામ નાન્યચ્ચિત્તસ્ય વિભ્રમઃ .
તત્રૈવ બ્રહ્મણિ સદા ચિત્તવિશ્રાન્તિરિષ્યતે .. ૩૧..
એવં વેદાન્તકલ્પોક્તસ્વાત્મલિઙ્ગપ્રપૂજનમ્ .
કુર્વન્ના મરણં વાપિ ક્ષણં વા સુસમાહિતઃ .. ૩૨..
સર્વદુર્વાસનાજાલં પદપાંસુમિવ ત્યજેત્ .
વિધૂયાજ્ઞાનદુઃખૌઘં મોક્ષાનન્દં સમશ્નુતે .. ૩૩..
.. ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય શ્રીગોવિંદભગવત્પૂજ્યપાદ શિષ્યસ્ય શ્રીમચ્છઙ્કરભગવતઃ વિરચિતા નિર્ગુણમાનસપૂજા સમાપ્ત ..